

इरावती

नवमकक्षायाः संस्कृतपाठ्यपुस्तकम्

अधिगम-सामग्री (R3)

लेखकः

नरेश कुमार

शास्त्री, एम.ए., एम्. फिल्, संस्कृत विभाग,
पञ्जाब विश्वविद्यालय, चण्डीगढ।

Based on Latest syllabus
and Guidelines by
NEP & CBSE



सप्तऋषि पब्लिकेशन
चंडीगढ़

SELECTED BOOK PREVIEW

IRAVATI | Class 9 Sanskrit R3

A curated look inside the actual printed book

IN THIS PREVIEW

- Class IX Sanskrit passages with accessible Hindi support
- Vocabulary, grammar and answer-guided exercises
- Stories, writing practice and school-assessment activities

ORIGINAL PDF PAGES INCLUDED

1, 6, 7, 8, 9, 10, 11, 12, 14, 18, 47, 119, 151, 175, 185, 195

These are selected, non-consecutive pages. Original printed page numbers and book content have been preserved.

SEE THE BOOK AND REQUEST SCHOOL INFORMATION

Open book details

For Schools & Teachers

अनुक्रमणिकाः

- प्रथमः पाठः - अहं नमामि 7
- द्वितीयः पाठः - मातामह्याः उपनेत्रम् 14
- तृतीयः पाठः - नद्यः 22
- चतुर्थः पाठः - नीतिवचनानि 30
- पञ्चमः पाठः - दानवीरः कर्णः 37
- षष्ठः पाठः - न गङ्गदत्तः पुनरेति कूपम् 47
- सप्तमः पाठः - विद्यामहिमा 60
- अष्टमः पाठः - बिलस्य वाणी न कदापि मे श्रुता 75
- नवमः पाठः - ऋतुः वसन्तः 89
- दशमः पाठः - सहजः स्वास्थ्यलाभः 103
- एकादशः पाठः - आर्यभट 119
- व्याकरणम् 133-157
- प्रथमः भागः श्रवण-कौशलम् एवं सम्भाषण-कौशलम् 158
- द्वितीयः भागः सृजनात्मक-लेखन-कौशलम् 169
- तृतीयः भागः पठन-कौशलम् 185
- चतुर्थः भागः अधिगम-सामग्री-आधारित लेखन-कौशलम् 195

प्रथमः पाठः

अहं नमामि

मूल पद्यांश — खण्ड १

अहं नमामि मातरं गुरुं नमामि सादरम् ॥१॥
स्वयं पठामि सर्वदा प्रियं वदामि सर्वदा ॥२॥



हिन्दी अनुवाद — मैं अपनी माता को प्रणाम करता/करती हूँ और गुरु को आदरपूर्वक नमन करता/करती हूँ। मैं सदा स्वयं अध्ययन करता/करती हूँ और हमेशा मधुर तथा प्रिय वचनलता/बोलती हूँ।

कठिन शब्दार्थ — नमामि—प्रणाम करता/करती हूँ; मातरम्—माता को; गुरुम्—गुरु को; सादरम्—आदरपूर्वक; स्वयं—अपने आप; पठामि—पढ़ता/पढ़ती हूँ; प्रियम्—मधुर/प्रिय।

मूल पद्यांश — खण्ड २

हितं करोमि सर्वदा शुभं करोमि सर्वदा ॥३॥
हरिं नमामि सादरं गुरुं नमामि सादरम् ॥४॥

हिन्दी अनुवाद — मैं सदा दूसरों की भलाई करता/करती हूँ और शुभ कार्य करता/करती हूँ। मैं भगवान हरि और अपने गुरु को आदरपूर्वक प्रणाम करता/करती हूँ।

कठिन शब्दार्थ — हितम्—भलाई; करोमि—करता/करती हूँ; शुभम्—अच्छा तथा मंगलकारी कार्य; हरिम्—भगवान विष्णु को; सादरम्—सम्मानपूर्वक।

प्रसङ्गः

प्रस्तुतपद्यांशे कविः मातरं, गुरुं तथा भगवन्तं प्रति श्रद्धां प्रकटयति। सः स्वाध्यायस्य, प्रियवचनस्य, परोपकारस्य तथा शुभकर्मणां महत्त्वं वर्णयति। एषः पद्यांशः अस्मान् सदाचारपूर्णं जीवनं जीवितुं प्रेरयति।

व्याख्या

अस्मिन् पद्यांशे बालकः कथयति यत् सः स्वमातरं तथा गुरुं सादरं नमति। माता अस्माकं पालनं पोषणं च करोति तथा गुरुः अस्मभ्यं ज्ञानं ददाति। अतः उभौ आदरणीयौ स्तः। बालकः सर्वदा स्वयं पठति तथा सर्वैः सह प्रियं मधुरं च वचनं वदति। सः सर्वदा अन्येषां हितं करोति तथा शुभानि कर्माणि आचरति। अन्ते सः भगवन्तं हरिं तथा गुरुं श्रद्धया नमति। एवं सः मातृभक्तेः, गुरुभक्तेः, ईश्वरभक्तेः, स्वाध्यायस्य, मधुरवचनस्य तथा परोपकारस्य आदर्शं प्रस्तुतयति।

मूल पद्यांश — खण्ड ३

चलामि नीति-सत्पथे हरामि मातृभू-व्यथाम् ॥५॥
दधामि साधुताव्रतं सृजामि कीर्तिसत्कथाम् ॥६॥
प्रभुं जपामि सादरम् अहं नमामि मातरम् ॥७॥

हिन्दी अनुवाद — मैं नीति और सत्य के उत्तम मार्ग पर चलता/चलती हूँ तथा मातृभूमि की पीड़ा दूर करने का प्रयास करता/करती हूँ। मैं सज्जनता का व्रत धारण करता/करती हूँ और अपने उत्तम कर्मों से यश की श्रेष्ठ कथा रचता/रचती हूँ। मैं प्रभु का आदरपूर्वक जप करता/करती हूँ और अपनी माता को प्रणाम करता/करती हूँ।

कठिन शब्दार्थ — नीति-सत्पथे—नीति और सत्य के मार्ग पर; हरामि—दूर करता/करती हूँ; मातृभू-व्यथाम्—मातृभूमि की पीड़ा; दधामि—धारण करता/करती हूँ; साधुताव्रतम्—सज्जनता

का व्रत; सृजामि—रचना करता/करती हूँ; कीर्तिसत्कथाम्—यश की श्रेष्ठ कथा; जपामि—जप करता/करती हूँ।

प्रसङ्ग:

प्रस्तुतपद्यांशे कवि: सत्यमार्गस्य, मातृभूमिसेवाया:, साधुताया:, सत्कर्मणां तथा ईश्वरभक्ते: महत्त्वं वर्णयति। स: प्रतिज्ञां करोति यत् स: सदैव नीतियुक्ते उत्तमे मार्गे चलिष्यति, मातृभूमे: दु:खं दूरीकरिष्यति तथा श्रेष्ठकर्मभि: यश: प्राप्स्यति।

व्याख्या

अस्मिन् पद्यांशे बालक: कथयति यत् स: सर्वदा नीतियुक्ते सत्पथे चलति। स: स्वमातृभूमे: दु:खं दूरीकर्तुं प्रयत्नं करोति। स: साधुताया: व्रतं धारयति, अर्थात् सत्यं, विनयं, दयां सदाचारं च स्वजीवने स्वीकरोति। स: उत्तमानि कार्याणि कृत्वा समाजे स्वकीयां श्रेष्ठां कीर्तिकथां रचयति। स: श्रद्धया प्रभो: नाम जपति तथा स्वमातरं सादरं नमति। एवं पद्यांश: अस्मान् देशसेवां, सदाचारं, ईश्वरभक्तिं मातृभक्तिं च कर्तुं प्रेरयति।

वयं शब्दार्थान् जानीम:

शब्द:	अर्थ:	हिन्दी	English	मातृभाषया अर्थ:
अहम्	अस्मद्	मैं	I	
नमामि	प्रणमामि	नमन करता हूँ/करती हूँ	I bow / I salute	
मातरम्	अम्बाम्	माता को	To the mother	
सादरम्	आदरसहितम्	आदर के साथ	Respectfully	
वदामि	कथयामि	बोलता हूँ/बोलती हूँ	I speak	
सर्वदा	सदा	सदैव	Always	
जपामि	जपं करोमि	जप करता हूँ/करती हूँ	I chant	
नीति-सत्पथे	नीतियुक्तसत्यमार्गे	नीति और सत्य के मार्ग पर	On the path of ethics and truth	

शब्दः	अर्थः	हिन्दी	English	मातृभाषया अर्थः
हरामि	दूरं करोमि	दूर करता हूँ/करती हूँ	I take away	
मातृभू-व्यथाम्	मातृभूमेः पीडाम्	मातृभूमि की पीड़ा को	The pain of the motherland	
दधामि	धारयामि	धारण करता हूँ/करती हूँ	I hold	
साधुताव्रतम्	सज्जनताव्रतम्	सज्जनता के व्रत को	The vow of goodness	
सृजामि	सर्जनं करोमि	रचना करता हूँ/करती हूँ	I create	
कीर्तिसत्कथाम्	सुगाथाम्	यश की सच्ची कथा को	The true story of glory	
चलामि	गच्छामि	चलता हूँ/चलती हूँ	I walk	
प्रभुम्	ईश्वरम्	प्रभु को	To God	
गुरुम्	शिक्षकम्	गुरु को	To the teacher	
स्वयम्	आत्मना	अपने आप	By oneself	
पठामि	पठनं करोमि	पढ़ता हूँ/पढ़ती हूँ	I read	
प्रियम्	मनोहारि	प्रिय, मनोहर	Pleasant	

अत्र इदम् अवधेयम्

पुरुषाः त्रयः भवन्ति — प्रथमपुरुषः, मध्यमपुरुषः, उत्तमपुरुषः च।

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	सः नमति	तौ नमतः	ते नमन्ति
मध्यमपुरुषः	त्वं नमसि	युवां नमथः	यूयं नमथ
उत्तमपुरुषः	अहं नमामि	आवां नमावः	वयं नमामः

प्रथमपुरुषः — एकवचने सः/सा/भवान्/भवती/कोऽपि पदार्थः (पुं., स्त्री., नपुं.) इत्यादयः कर्तारः भवन्ति। तदनुसारं तस्य द्विवचनं बहुवचनं च अपि भवति।
अस्मिन् पाठे लट्-लकारे उत्तमपुरुषस्य एकवचनस्य प्रयोगः अस्ति।

वयम् अभ्यास कुर्मः

१.कवितायाः निम्नलिखितासु पङ्क्तिषु रिक्तस्थानानि पूरयत—

यथा — हरामि मातृभू-व्यथाम्।

क. गुरुं _____ सादरम्।
ख. हितं करोमि _____।
ग. _____ नीति-सत्पथे।
घ. दधामि _____।
ङ. _____ कीर्तिसत्कथाम्।

उत्तराणि

क. नमामि ख. सर्वदा ग. चलामि
घ. साधुताव्रतम् ङ. सृजामि

२. एकशब्देन उत्तरं लिखत—

यथा — प्रश्नः: अहं कां नमामि ? उत्तरम्: मातरम्।

क. **प्रश्नः:** किं करोमि सर्वदा ?
उत्तरम्: हितम्।
ख. **प्रश्नः:** अहं प्रभुं कथं जपामि ?
उत्तरम्: सादरम्।
ग. **प्रश्नः:** अहं कां हरामि ?
उत्तरम्: मातृभू-व्यथाम्।

घ. **प्रश्नः:** अहं किं दधामि ?

उत्तरम्: साधुताव्रतम्।

ङ. **प्रश्नः:** अहं कां सृजामि ?

उत्तरम्: कीर्तिसत्कथाम्।

३. प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत—

यथा — प्रश्नः: त्वं किं दधासि ?

उत्तरम्: अहं साधुताव्रतं दधामि।

क. प्रश्नः: त्वं नित्यं कां नमसि ?

उत्तरम्: अहं नित्यं मातरं नमामि।

ख. प्रश्नः: त्वं स्वयं किं किं करोषि ?

उत्तरम्: अहं स्वयं पठामि प्रियं च वदामि।

ग. प्रश्नः: त्वं कस्याः व्यथां हरसि ?

उत्तरम्: अहं मातृभूमेः व्यथां हरामि।

घ. प्रश्नः: त्वं किं धरसि ?

उत्तरम्: अहं साधुताव्रतं धरामि।

ङ. प्रश्नः: त्वं कां सृजसि ?

उत्तरम्: अहं कीर्तिसत्कथां सृजामि।

क्रियाकलापः

१. रिक्तस्थानानि पूरयित्वा वाक्यानि रचयत—

यथा — अहं चित्रं सृजामि।

क. वयं _____ _____।

ख. _____ _____ वदामि।

ग. अहं _____ _____।

घ. _____ _____ चलामः।

ङ. त्वं _____ _____।

सम्भावित-उत्तराणि

क्रियाकलापः १

क. वयं हितं कुर्मः। ख. अहं प्रियं वदामि। ग. अहं पुस्तकं पठामि।

घ. वयं सत्पथे चलामः। ङ. त्वं मातरं नमसि।

द्वितीयः पाठः

मातामह्याः उपनेत्रम्

वस्तुओं को उनके निर्धारित स्थान पर रखना उचित है। कभी-कभी असावधानी के कारण जब आवश्यक वस्तु दिखाई नहीं देती, तब हम धैर्यपूर्वक उसे खोजते हैं और परिवार का सहयोग लेते हैं। इस हास्यपूर्ण कहानी में रमा अपनी नानी का चश्मा खोजती है।

It is proper to keep things in their designated places. Sometimes, due to carelessness, a necessary item cannot be found. At such times, we search patiently and seek help from our family. In this humorous story, Rama searches for her maternal grandmother's spectacles.

मूलपाठः

खण्ड १

एषा रमायाः मातामही अस्ति। रमायाः मातामही सर्वदा उपनेत्रं धारयति। मातामह्याः पुस्तकानां पठने अभिरुचिः अस्ति। मातामही प्रतिदिनं प्रातः वार्तापत्रं पठति। एकस्मिन् दिने मातामही प्रातः एव रमां उत्थापयितुं प्रयासं अकरोत्। मातामही उपनेत्रं न लभते स्म। उपनेत्रं विना मातामही कष्टम् अनुभवति स्म। सा आवश्यकानि वस्तूनि अन्वेष्टुं समर्था न आसीत्। रमा गाढनिद्रायाम् आसीत्। सा निद्रां न त्यजति स्म। मातामही रमां अति-स्नेहेन उत्थापितवती। सा रमाम् उपनेत्रम् अन्वेष्टुम् उक्तवती। रमा निद्रायाम् एव उपनेत्रम् अन्वेष्टुम् आरभत। सा उपधानानाम् अधः उपनेत्रम् अन्विष्टवती। मातामही बहुवारं तत्र उपनेत्रं स्थापयति स्म। उपनेत्रम् उपधानानाम् अधः न लब्धम्। मातामही रमां समयं पृच्छति स्म। रमा अवदत्- लघुसूचिका पञ्चमे अङ्के दीर्घसूचिका षष्ठे अङ्के च अस्ति। प्रायशः सार्ध-पञ्चवादन-समयः आसीत्। मातामह्या वार्तापत्रं पठनीयम् आसीत्, भ्रमणाय च गन्तव्यम् आसीत्।

हिन्दी अनुवाद — यह रमा की नानी हैं। रमा की नानी हमेशा चश्मा पहनती हैं। उन्हें पुस्तकें पढ़ने में रुचि है और वे प्रतिदिन प्रातः समाचार-पत्र पढ़ती हैं। एक दिन प्रातः उन्होंने रमा को जगाने का प्रयास किया, क्योंकि उन्हें अपना चश्मा नहीं मिल रहा था। चश्मे के बिना उन्हें कठिनाई हो रही थी और वे आवश्यक वस्तुएँ खोज नहीं पा रही थीं। रमा गहरी नींद में थी। नानी ने उसे बहुत प्यार से जगाकर चश्मा खोजने के लिए कहा। रमा ने नींद में ही तकियों के नीचे चश्मा खोजा, क्योंकि नानी कई बार वहाँ चश्मा रख देती थीं, परन्तु चश्मा नहीं मिला।

शब्दः	अर्थः	हिन्दी	English	मातृभाषया अर्थः (पञ्जाबी)
स्नानगृहे	स्नानार्थं गृहे	स्नानघर में	In the bathroom	
अङ्गणे	प्राङ्गणे	आँगन में	In the courtyard	
खट्वायाम्	शय्यायाम्	खाट पर	On the cot	
ऊर्ण-स्यूते	ऊर्णपुटे	ऊन के थैले में	In the woolen bag	
गोलकानि	ऊर्ण-कन्दुकानि	ऊन के गोले	Balls of yarn	
दर्पणस्य	आदर्शस्य	शीशे का	Of the mirror	
कपाटिकायाम्	कपाटे	अलमारी में	In the cupboard	
शाटिकाः	स्त्रीणां वस्त्रविशेषाः	साड़ियाँ	Sarees	
पर्यङ्कस्य	खट्वायाः	पलंग का	Of the bed	

अत्र इदम् अवधेयम्

१. अव्ययपदानि

यस्य पदस्य नाना-विभक्ति-वचनेषु परिवर्तनं न भवति, तत् पदम् अव्ययम् भवति।

अव्ययस्य परिभाषा

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥

सरलार्थः — जिस शब्द में लिंग, विभक्ति और वचन के कारण कोई परिवर्तन नहीं होता, उसे अव्यय कहते हैं।

षष्ठः पाठः

न गङ्गदत्तः पुनरेति कूपम्

यह पाठ सुप्रसिद्ध नीतिग्रन्थ पञ्चतन्त्र से उद्धृत है, जहाँ गङ्गदत्त नामक मेंढक की कथा के माध्यम से हमें विवेकपूर्ण जीवन जीने की शिक्षा मिलती है। इसका मुख्य संदेश यह है कि अपने स्वार्थ या प्रतिशोध के लिए दुर्जनों की सहायता लेना कभी भी हितकारी नहीं होता। अतः एक बुद्धिमान व्यक्ति अपनी पूर्व में की गई गलती को समझकर, गङ्गदत्त की तरह पुनः उस कुएँ में नहीं जाता है। इस नीति को अपनाते हुए वह फिर कभी उस सङ्कट में नहीं पड़ता।

This text is excerpted from the renowned book of fables, the Panchatantra, which imparts a vital lesson in wisdom and self-preservation through the story of a frog named Gangadatta. The narrative profoundly highlights how seeking the alliance of the wicked for personal revenge or temporary gain ultimately leads to one's own ruin. Consequently, it teaches that a truly wise person learns from past mistakes and resolves never to step back into a dangerous or toxic situation.

अनुच्छेदः — गङ्गदत्तस्य निवासः

मूलपाठः

गङ्गाम् उभयतः विविधैः वृक्षैः सुशोभिताः ग्रामाः आसन्। तत्र एकस्मात् ग्रामात् बहिः वृक्षस्य अधः एकः जीर्णः कूपः आसीत्। तस्मिन् कूपे मण्डूकानाम् अधिपतिः गङ्गदत्तः परिजनैः सह निवसति स्म। सः गङ्गदत्तः परिश्रमं विनैव प्रभुत्वं प्राप्नोत्। अतः सः गर्वितः अभवत्।

सरल-संस्कृत-व्याख्या

गङ्गानद्याः द्वयोः पार्श्वयोः सुन्दराः ग्रामाः आसन्। एकस्य ग्रामस्य बहिः वृक्षस्य अधः पुरातनः कूपः आसीत्। तस्मिन् कूपे गङ्गदत्तः नाम मण्डूकराजः स्वपरिवारजनैः सह वसति स्म। सः परिश्रमं विना मण्डूकानां राजा अभवत्। अतः तस्मिन् अहङ्कारः उत्पन्नः अभवत्।

हिन्दी अनुवादः

गंगा नदी के दोनों ओर विभिन्न प्रकार के वृक्षों से सुशोभित गाँव बसे हुए थे। वहाँ एक गाँव के बाहर एक वृक्ष के नीचे एक पुराना कुआँ था। उस कुएँ में मेंढकों का राजा गंगदत्त अपने

एकादशः पाठः

आर्यभट

भारतवर्ष की अमूल्य निधि है ज्ञान-विज्ञान की सुदीर्घ परंपरा। इस परंपरा को संपोषित किया प्रबुद्ध मनीषियों ने। इन्हीं मनीषियों में अग्रगण्य थे आर्यभट। दशमलव पद्धति आदि के प्रारम्भिक प्रयोक्ता आर्यभट ने गणित को नई दिशा दी। इन्हें एवं इनके प्रवर्तित सिद्धान्तों को तत्कालीन रूढ़िवादियों का विरोध झेलना पड़ा। वस्तुतः गणित को विज्ञान बनाने वाले तथा गणितीय गणना पद्धति के द्वारा आकाशीय पिंडों की गति का प्रवर्तन करने वाले ये प्रथम आचार्य थे। आचार्य आर्यभट के इसी वैदुष्य का उद्घाटन प्रस्तुत पाठ में है।

India has an invaluable treasure of a long tradition of knowledge and science. The enlightened sages have cherished this tradition. Among these sages, the foremost was Aryabhata. An early user of the decimal system, Aryabhata gave a new direction to mathematics. These sages and the principles they propounded had to face opposition from the orthodox of the time. In fact, they were the first Acharyas to make mathematics a science and to propound the motion of celestial bodies through mathematical calculation methods. The introduction to this scholarship of Acharya Aryabhata is presented in the text.

आर्यभटः

अनुच्छेदः १ — पृथिव्याः गतिः तथा आर्यभटस्य सिद्धान्तः

मूलपाठः

पूर्वदिशायाम् उदेति सूर्यः पश्चिमदिशायां च अस्तं गच्छति इति दृश्यते हि लोके। परं न अनेन अवबोध्यमस्ति यत् सूर्यः गतिशीलः इति। सूर्यः अचलः। पृथिवी तु चला। सा स्वकीये अक्षे घूर्णति इति साम्प्रतं सुस्थापितः सिद्धान्तः। सिद्धान्तोऽयं प्राथम्येन येन प्रवर्तितः, सः आसीत् महान् गणितज्ञः ज्योतिर्विद् च आर्यभटः। पृथिवी स्थिरा वर्तते इति परम्परया प्रचलिता रूढिः तेन प्रत्यादिष्टा।

- बालक: पठति। (एक बालक)
- बालकौ पठत:। (दो बालक)
- बालका: पठन्ति। (अनेक बालक)

४. विभक्तियाँ और उनके अर्थ

संस्कृत में वाक्य बनाने के लिए विभक्तियों का बहुत महत्त्व है। विभक्तियाँ बताती हैं कि वाक्य में कोई शब्द कर्ता, कर्म, साधन, सम्बन्ध, स्थान आदि किस रूप में प्रयुक्त हुआ है।

संस्कृत में **सात विभक्तियाँ** तथा **एक सम्बोधन** होता है।

विभक्ति	कारक	चिह्न	उपयोग	उदाहरण
प्रथमा	कर्ता	ने	कार्य करने वाला	राम: पठति।
द्वितीया	कर्म	को	जिस पर कार्य हो	राम: फलम् खादति।
तृतीया	करण	से, द्वारा	साधन का बोध	राम: लेखन्या लिखति।
चतुर्थी	सम्प्रदान	के लिए, को	देने या प्राप्त करने वाला	माता बालकाय फलम् ददाति।
पञ्चमी	अपादान	से	अलग होने का बोध	वृक्षात् पत्रं पतति।
षष्ठी	सम्बन्ध	का, की, के	सम्बन्ध बताना	रामस्य पुस्तकम्।
सप्तमी	अधिकरण	में, पर	स्थान का बोध	विद्यालये छात्रा: सन्ति।
सम्बोधन	सम्बोधन	हे!	किसी को पुकारना	हे मित्रआगच्छ। !

विभक्तियों को याद रखने का सरल सूत्र

प्रथमा – कौन? (कर्ता)
द्वितीया – किसको? (कर्म)
तृतीया – किससे? (करण)
चतुर्थी – किसके लिए? (सम्प्रदान)

अभ्यासः 2

पिपासितः काकः

काकः – ग्रीष्मकालः – पिपासा – घटः – जलम् – शिलाखण्डाः – बुद्धिमत्ता – तृप्तिः

शीर्षकम्

_____

कथा

_____

_____

_____

_____

_____

_____

_____

_____

कथायाः शिक्षा

_____

_____

अभ्यासः 3

कथाविषयः

मित्रस्य साहाय्यम्

सहायकशब्दाः

मित्रौ, रुग्णः, विद्यालयः, गृहकार्यम्, साहाय्यम्, पाठः, पुस्तकानि, प्रसन्नः, धन्यवादः, सच्चा मित्रता

शीर्षकम्

_____

तृतीयः भागः

पठन-कौशलम्

Reading Skills — 20 अंकाः

पठन-कौशलस्य अन्तर्गतं छात्राः सरलसंस्कृतगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखन्ति। प्रत्येकं गद्यांशः 10 अङ्कानां भविष्यति।

अंक-विभाजनम्

प्रत्येकस्मिन् गद्यांशे—

1. षट् वस्तुनिष्ठप्रश्नाः — 6 अंकाः
2. चत्वारः अतिलघूत्तरप्रश्नाः — 4 अंकाः
3. कुलम् — 10 अंकाः

द्वौ गद्यांशौ — 2 × 10 = **20 अंकाः**

इरावती-पुस्तकाधारिताः पठन-अभ्यासाः

सामान्यनिर्देशाः

1. पठनांशं ध्यानपूर्वकं पठत।
2. प्रश्नानाम् उत्तराणि पठनांशस्य आधारेण लिखत।
3. सरल-संस्कृतभाषायाः प्रयोगं कुरुत।
4. प्रश्नानुसारम् एकपदेन अथवा पूर्णवाक्येन उत्तरं लिखत।
5. प्रथमाः पञ्च अभ्यासाः समाधानसहिताः सन्ति।
6. अन्तिमाः पञ्च अभ्यासाः स्वाभ्यासाय सन्ति।

भागः 'क'

समाधानसहिताः पठन-अभ्यासाः

पठनांशः 1

एषा रमायाः मातामही अस्ति। रमायाः मातामही सर्वदा उपनेत्रं धरति। मातामह्याः पुस्तकानां पठने अभिरुचिः अस्ति। मातामही प्रतिदिनं प्रातः वार्तापत्रं पठति। एकस्मिन् दिने

चतुर्थः भागः

अधिगम-सामग्री-आधारित लेखन-कौशलम्

Writing Skills Based on Learning Resources — 10

अंकाः 1

खण्डः 'क' — लघूत्तरात्मकप्रश्नाः

1. चत्वारः प्रश्नाः
2. प्रत्येकः प्रश्नः 1 अंकस्य
3. 4 × 1 = 4 अंकाः

खण्डः 'ख' — दीर्घोत्तरात्मकप्रश्नाः

1. द्वौ प्रश्नौ
2. प्रत्येकः प्रश्नः 3 अङ्कयोः
3. 2 × 3 = 6 अंकाः

खण्डः निर्देशः द्वयोः प्रश्नयोः एकस्य प्रश्नस्य विस्तृतरूपेण उत्तरं लिखत। एते प्रश्नाः 'इरावती' पुस्तकस्य पाठानां आधारेण भविष्यन्ति। **(एकस्य प्रश्नस्य उत्तरं लिखत।)**

अङ्काः — 4

कुलम् — 14 अंकाः

नोट : इस भाग में दिए गए सभी प्रश्न पुस्तक के **भाग–प्रथम** में सम्मिलित पाठों पर आधारित हैं। इन प्रश्नों के उत्तर **भाग–प्रथम** के प्रत्येक पाठ के अंत में दिए गए अभ्यासों में उपलब्ध हैं। अतः विद्यार्थी इस भाग की तैयारी के लिए भाग–प्रथम के पाठों तथा उनके अभ्यासों का नियमित अध्ययन करें। इसी अभ्यास सामग्री से उन्हें विभिन्न प्रकार के प्रश्नों के उत्तर प्राप्त होंगे।